योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः १००

शततमः सर्गः १००

श्रीराम उवाच ।

युक्तिः स्यात्कीदृशी ब्रह्मन्संसारे दुःखशान्तये ।

तेषां येषामयं पक्षः श्रूयतामुच्यतां ततः ।। १

यावज्जीवं सुखं जीवेन्नास्ति मृत्युरगोचरः ।

भस्मीभूतस्य शान्तस्य पुनरागमनं कुतः ।। २

श्रीवसिष्ठ उवाच ।

यं यं निश्चयमादत्ते संविदन्तरखण्डितम् ।

तत्तथैवानुभवति प्रत्यक्षमिति सर्वगम् ।। ३

यथा खं सर्वगं शान्तं तथा चिद्व्योम सर्वगम् ।

तदेवैक्यमथ द्वैतमन्यार्थस्यात्यसंभवात् ।। ४

सर्गादौ तदृतेऽन्योऽर्थो महाप्रलयरूपिणि ।

अकाणरत्वान्नास्त्येव ब्रह्मैवेदमतस्ततम् ।। ५

समस्तवेदशास्त्रार्थं ये महाप्रलयादि च ।

नेच्छन्ति ते महामूढा निःशास्त्रा नो मृता इव ।। ६

सर्वशास्त्राविरुद्धेन सर्वं ब्रह्मेदमित्यलम् ।

स्थितं सानुभवं योक्तृ येषां तैर्न कथाक्रमः ।। ७

नित्या निरन्तरोदेति यादृशी संविदाशये ।

भूयते तन्मयेनैव पुंसा देहोऽस्तु माथवा ।। ८

बोधाच्चेत्संविदो जातः स दुःखी पुरुषो भवेत् ।
विरुद्धं वेदनं यावत्तावज्जीवोऽङ्ग तन्मयः ।। ९
जगच्चिद्व्योमकचनमात्रमेवेति भाविते ।
तत्कथं वेदनं व्योम्ना बोधः कस्य कुतो भवेत् ।। १०
न कानिचित्प्रधावन्ति एकनिश्चयसंविदाम् ।
पुंसां सुखानि दुःखानि रजांसि नभसामिव ।। ११
संवित्सत्यास्त्वसत्या वा निश्चयस्तावदीदृशः ।
आबालमेतत्संसिद्धं केनापह्नूयते कथम् ।। १२
न देहः पुरुषो वापि जीवोऽन्य उपलभ्यते ।
संवित्सर्वमिदं सा तु यथा वेत्ति तथा जगत् ।। १३
सा सत्याप्यथवासत्या तया देहोऽनुभूयते ।
स्वातन्त्र्येण यथा स्वप्ने पाताले खे जले दिवि ।। १४
संवित्सत्यास्त्वसत्या वा तावन्मात्रः स्मृतः पुमान् ।
स यथानिश्चयो नूनं तत्सत्यमिति निश्चयः ।। १५
प्रामाण्यं सर्वशास्त्राणामेतेनैव प्रसिद्ध्यति ।
सर्वसिद्धान्तसिद्धान्त एष एवेति मे मतिः ।। १६
तस्मादबोधता यास्ते यथा संवित्तथैव सा ।
भवत्यकलुषाकारा तथैव फलभागिनी ।। १७
देशकालक्रियाद्रव्यवेदशास्त्रैषणाभ्रमैः ।
अबोधता तु या संवित्कदाचित्सा न नश्यति ।। १८
आविर्भवति सा भूयः क्षीणाशङ्का क्षणेन चेत् ।
तत्केन संविदो दुःखं कदा नामोपशाम्यति ।। १९
संविदेव नृणां जीवः स यथा दृढभावनः ।
तथा सुखी वा दुःखी वा भवेदित्येष निश्चयः ।। २०
संविच्चेदस्ति तज्ज्ञानां शरणं भवभेदने ।
नास्ति चेत्तच्छिलामूकमान्ध्यमेवावशिष्यते ।। २१

यत्तयैव च संवित्त्या वेदनेनैव लभ्यते ।

अयं स्वभावज्ञप्त्यान्तर्जाड्यं पुंसेव निद्रया ।। २२

श्रीराम उवाच ।

दिक्ष्वधस्ताच्च नान्तोऽस्या भावी नापि जगत्क्षयः ।

अस्तीति भावितं येन संत्यक्ताऽभावबुद्धिना ।। २३

विज्ञानघनमेवेदमिति नूनमपश्यता ।

पश्यता च यथादृष्टं सर्वक्षयमपश्यता ।। २४

तस्य स्यात्कीदृशी ब्रह्मत्युक्तिराधिविनाशने ।

इति मे संशयं छिन्धि भूयो बोधाभिवृद्धये ।। २५

श्रीवसिष्ठ उवाच ।

अत्रैकं तावदुचितं पूर्वमेव तथोत्तरम् ।

द्वितीयमुत्तरं न्याय्यं वक्ष्यमाणमिदं श्रृणु ।। २६

ईदृग्भावस्त्वया प्रोक्तो यः पुमान्पुरुषोत्तम ।

स तावच्चेतनामात्रं भवतीत्यनुभूयते ।। २७

स चाकारविनाशेन युज्यते नात्र संशयः ।

अथाविनाशो देहश्चेत्तदुःखस्यात्र कः क्रमः ।। २८

भवेद्भागविभागात्मविनाशस्त्वविचारितः ।

अवश्यं तस्य भवति किलेति ननु निश्चयः ।। २९

मृतः स संविदात्मत्वाद्भूयो नो वेत्ति संसृतिम् ।

ज्ञानधौता न या संविन्न सा तिष्ठत्यसंसृतिः ।। ३०

अथवा नास्ति संवित्तिरिति निश्चयवान्यदि ।

ततस्तादृग्वेदनतो भवत्येव दृषज्जडः ।। ३१

यथावेदनमर्थेषु चित्त्वे देहक्षयात्क्षते ।

मृतिरेव परं श्रेयो दृष्टं नानुभवादिति ।। ३२

असंभवाच्छुद्धविदो निःशरीरा भवन्ति ये ।

जडभावा जडीभूय दुर्भेदान्ध्या भवन्ति ते ।। ३३

ये चापि स्वप्नपुरवत्सर्वं पश्यन्ति चिन्मयाः ।

तेषामिदमिवाशेषं जगज्जालं प्रवर्तते ।। ३४

स्थैर्यास्थैर्येण भूतानां किमपूर्वमतौ भवेत् ।

भूतस्थैर्ये तथास्थैर्ये सुखं चैवासुखं समम् ।। ३५

स्थिरमस्त्वस्थिरं वापि मह्यादिमहतामपि ।

चिद्भामात्रमिदं भाति यावदज्ञानमाततम् ।। ३६

[१]संविदा संविदोऽसत्तामिहाव्याप्य विनष्टया ।

निर्णीयाङ्गीकृतं यैर्वा जाड्यं तद्बालकैरलम् ।। ३७

येषां विद्भ्यः शरीराणि ते वन्द्याः पुरुषोत्तमाः ।

शरीरेभ्यो विदो येषां तैरलं पुरुषाधमैः ।। ३८

चिद्रूपो जीवबीजौघ आकाशकृमिजालवत्

ऊर्ध्वं तिर्यगधो याति पूर्यमाण इव स्वयम् ।। ३९

चेत्यते येन कर्तान्यो बीजौघेन स तत्परः ।

तथैवानुभवत्यन्तः स्वयमेव विवल्गति ।। ४०

यद्यथा चेत्यते येन तज्जीवेनाशु तेन तत् ।

चिद्रूपेणाप्यते सिद्धमेतदाबालमक्षतम् ।। ४१

यथा धूमस्य नभसि यथाम्भोधौ महाम्भसः ।

आवर्तवृत्तयश्चित्रास्तथा चिद्व्योम्नि संसृतेः ।। ४२

पुरी भवति चिद्व्योम यथा स्वप्ने नरं प्रति ।

तथादिसर्गात्प्रभृति तदेवेदं जगत्स्थितम् ।। ४३

सहकारिनिमित्तानि यथा स्वप्ने न सन्ति वै ।

पृथिव्यादीनि भूतानि तथैवादौ जगत्स्थितेः ।। ४४

अङ्गानां स्वप्ननगरे वसुधा विविधाः कृताः ।

यास्ता एव जगत्स्वप्ननगरे पुष्टतां गताः ।। ४५

चिन्मात्राकाशमेवेमाः प्रजा द्वैतैक्यवर्जिताः ।

के वात्र रञ्जनान्या खे यद्भाभाति खमेव तत् ।। ४६

चिच्चन्द्रिका चतुर्दिक्कं शीतलाह्लादकारिणी ।

तनोति चेतनालोकं तस्येदं कचनं जगत् ।। ४७

अद्यैवाद्यन्तयोर्व्योम्नि चिन्मये सर्गदर्शनम् ।

चिदुन्मेषनिमेषाभ्यां खात्मोदेत्यस्तमेति च ।। ४८

यद्यथा वेत्ति यत्तत्सत्तथैवानुभवत्यलम् ।

यस्मात्समस्तं चिन्मात्रं किमिवात्र न विद्यते ।। ४९

शरदाकाशविशदं संविदः सौम्यमानसाः ।

असन्त एव तिष्ठन्ति सन्तोऽधिगततत्पदाः ।। ५०

निर्मानमोहा जितसङ्गदोषाः

प्रवाहसंप्राप्तनिजार्थभाजः ।

तिष्ठन्ति कार्यव्यवहारदृष्टौ

निरामया यन्त्रमया इवैते ।। ५१

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मो० निर्वाणप्रकरणे उत्तरार्धे नास्तिक्यनिराकरणं नाम शततमः सर्गः ।।१००।।

1. संविदः कालतोऽसत्ता क्षणिकत्वं देशतः असत्ता तु जाड्यं द्विविधमपि तां अव्याप्य अस्पृष्ट्वा विनष्टया क्षणिकत्वाभिमतसंविदा जाड्यम्। क्षणिकत्वस्याप्युपलक्षणमेतत्। - टीका